शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)
साहित्य दर्पण: अष्टम: परिच्छेद:

प्राचीनोक्तानां दश शब्दगुणानां दशार्थ गुणानां च केषु गुणेषु कथं अन्तर्भाव: इति निरूपणम्।

नन्वु प्राचीनै: वामनादिभि: गुणानां शब्दार्थ धर्मत्वं स्वीकृतम्। तथा च दश शब्द गुणा: दशार्थ गुणा: कथिता इति न तेषां त्रिषु गुणेषु अन्तर्भावो भवितुमर्हतीति न वाच्यं तथाहि बहूनां पदानामेकपदवद् भासनात्मा श्लेष: ओजसि अन्तर्भवति। आरोहावरोहक्रम: समाधि:। अथवा उत्कर्षापकर्षयो: वैरस्यानावहत्वे क्रम: समाधि:। स च अव्यगाढत्वादोज एव। पदानां विकटत्वलक्षणा उदारता सापि ओज एव। ओजो मिश्रित शैथिल्यात्मा प्रसाद ओज एव। पृथक्पदत्वं माधुर्यं यत्तु गुणत्वं कथ्यते तस्य प्रसादेऽन्तर्भाव:। कान्ति औज्ज्वल्यम्। सा च ग्राम्यत्व दोषाभाव रूपा। अपारुष्यं सुकुमारता। सा च दुःश्रवत्वाभावरूपेति न उभयोर्गुणत्वम्। मार्गाभेदस्वरूपिणी समता तु क्वचित् अनुचिते स्थले प्रयोगा दोष एव। यत्र तु औचित्यं तत्र सुकुमारतया माधुर्यं प्रौढतया ओजस्यन्तर्भाव:। उक्तं च साहित्य दर्पणकारेण —

'श्लेष: समाधिरौदार्यं प्रसाद इति ये पुन:।
- - - - - - - - - - - - - - - - - - - - ॥
- - - - - - - - - - - - - - - - - - - - ।
- - - - - - - - - - - - - - - - - - - - ॥
- - - - - - - - - - - - - - - - - - - - ।
- - - - - - - - - - - - - - - - - - - - ॥
अन्यथोक्त गोपनस्य अत्यन्तो यथायथम् ॥'

एवं प्राचीनोक्तानां दश शब्द गुणानां त्रिषु गुणेषु अन्तर्भावात् दश शब्द गुणा: पृथक्।

अर्थ गुणेषु साभिप्रायत्वमोज:, तच्च अपुष्टार्थत्व दोषाभाव रूपम्। अर्थ वैमल्यं प्रसाद:, स च अधिक पदत्व दोषाभाव रूप:। उक्तिवैचित्र्यं माधुर्यं तच्च अनवीकृतत्वं दोषाभाव रूपम्। अपारुष्यं सौकुमार्यम्। तच्च अमङ्गल रूपाश्लीलत्व दोषाभाव रूपम्। अग्राम्यत्वम् उदारता, सा च ग्राम्यत्वदोषाभावरूपा एवं दोषाभाव रूपा एवैते प्राचीनोक्ता: पञ्च अर्थ गुणा:। वस्तु स्वभावस्फुटत्वं रूपाया: अर्थ व्यक्ते स्वभावोक्त्यलंकारे संग्रह:। दीप्त रसत्व रूपाया: कान्ते: रसध्वनौ गुणीभूत व्यङ्ग्ये चान्तर्भाव:। क्वचित्कौटिल्यानुल्बणत्व उपपत्ति योगरूप घटनात्मा श्लेष: विचित्रतामात्रम्। प्रक्रान्त प्रकृति प्रत्ययाविपर्यासेन अर्थस्य विसंवादिता विच्छेद: समता प्रक्रम भङ्गाभावरूपा। अर्थ दर्शन रूप: समाधि: न गुण:, किन्तु काव्यस्य शरीर मात्र निर्वाहक:। एकैकैव समाधि: व्यासंस्य चमत्कार मात्रं न गुण:, रसस्याधायकतयाऽनुपकारकत्वात्। उक्तं च विश्वनाथेन साहित्य दर्पणे —

'ओज: प्रसादो माधुर्यं सौकुमार्यमुदारता।
- - - - - - - - - - - - - - - - - - - - - -
- - - - - - - - - - - - - - - - - - - - ॥
- - - - - - - - - - - - - - - - - - - - ।
श्लेषो विचित्रतामात्रमदोष: समता परम्।
न गुणत्वं समाधेश्च - - - - - - - - ॥' इति

एवं पृथक् दशार्थ गुण स्वीकारस्या-
वश्यकतैव नास्तीति दिक्।

उपेन्द्र शांडिल्य
एसो० प्रो० साहित्य
रा० उत्कृ० महावि०
फुलवरिया, ब्रह्मचार्य

शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)
साहित्य दर्पण: पञ्चम: परिच्छेद:

महिमभट्टाभिमतं वस्त्वलङ्कारयोरनुमान गतार्थत्वं संस्थाप्य तस्य खण्डन प्रकार: प्रदर्शनम्।

ननु 'भ्रम धार्मिक विस्रब्धम्' इत्यत्र पदे व्यज्यमानं वस्तु 'अभ्रमण' रूपम्' तदपि अनुमेयमेव। तथा च 'गोदावरी तीरं भीरु-भ्रमणायोग्यं सिंहवत्त्वात्, यत्रैवं तत्रैवं, यथा गृहम्'। अत्र यद् यद् भीरु-भ्रमणम् तत्तद् भय कारणानुपलब्धि पूर्वकम् इति व्याप्तिः। अनेन गोदावरी तीरं भीरुभ्रमणायोग्यम् इत्यनुमीयते, इति चेत्? न। हेतोर्व्यभिचारित्वात्। यद् यद् भीरुभ्रमणं तत्तद् भयकारणानुपलब्धि पूर्वकम् इति व्यतिरेक व्याप्तेरेवासिद्धत्वात् भीरोरपि कार्य गौरवेण गुरोः प्रभोर्वा निदेशेन प्रियानुरागेण वा गमनस्य सम्भवात्। पुंश्चल्या वचनं प्रामाणिकं न वेति सन्देहाद् व्याप्तेः सन्देहत्वाद् हेतोः सन्दिग्धासिद्धत्वं च।

एवमेव 'जलकेलितरलकरतल' इत्यत्र राधिकावदने चन्द्रः आत्म दर्शनादर्शनाभ्यां चक्रवाकविघटनसङ्घटनकारित्वात् गगनस्थचन्द्रवत्। इत्यनुमानेन रूपकालङ्कारोऽनुमेय एवेत्यपि न वक्तुम्। नहि चन्द्रस्य तयोः विघटन सङ्घटनकारीति नियमः। व्याघ्रादि दर्शनादपि तत्सम्भवात्, रवौ चन्द्राभावेऽपि तद्वियोगस्य कवि सम्प्रदाय प्रसिद्धत्वाच्च, हेतोर्व्यभिचारित्वमिति। अतो नालङ्कारव्यङ्ग्यस्यानुमाने गतार्थता।

एतेन अनुमानं नाम पक्षसत्त्व सपक्षसत्त्व विपक्षव्यावृत्तत्वविशिष्टलिङ्गाल्लिङ्गिनो ज्ञानम्। तत्र च वाच्यादिसम्बन्धोऽर्थस्तावन्न प्रतीयते। अन्यथा अतिप्रसङ्गः स्यात्। इति बोध्य बोधकयोरर्थयोः कश्चित् सम्बन्धोऽस्त्येव। तत्र च बोधकोऽर्थो लिङ्गम् बोध्यश्च लिङ्गी। बोधकस्य चार्थस्य पक्षसत्त्वं निबद्धमेव। सपक्षसत्त्वविपक्षव्यावृत्तत्वे अनिबद्धेऽपि सामर्थ्यादवसेये। अस्मादत्र वाच्यार्थो लिङ्गरूपो लिङ्गिनो व्यङ्ग्यार्थस्यावगमस्तदनुमान एव पर्यवस्यतीति यदुक्तं तदपि परास्तम्।

एवं 'दृष्टिं हे प्रतिवेशिनि' इत्यादौ तनूल्लिखनम् एकाकितया च स्रोतोगमनम्, तस्याः परकामुकोपभोगस्य लिङ्गिनो लिङ्गम्। यथा- 'इयम् परकामुकोपभोगवती एकाकितया स्रोतोगमने सति तनूल्लिखनवत्त्वात् कुलटावत्'। अयमपि हेतुर्व्यभिचारी। यतो हि यत्र यत्र एकाकितया स्रोतोगमने सति तनूल्लिखनं तत्र तत्र परकामुकोपभोगः इति व्याप्तिर्न सम्भवति, एकान्तस्नेहेनापि स्रोतोगमनस्य तनूल्लिखनत्वस्य च सम्भवात्।

एवं 'निःशेषच्युतचन्दनं स्तनतटम्' इत्यादौ तैस्तैर्लिङ्गैः दूत्यास्तत्कामुकोपभोगोऽनुमीयते। यथा- 'प्रतिपाद्या दूती तत्कामुकोपभोगवती चन्दनच्यवनादेः' इति तन्न युक्तम्। तथाहि दूत्याः तत् कामुकोपभोगः किं प्रतिपाद्यया दूत्या तत्कालसन्निहितैः वान्यैः तत्काव्यार्थभावनया वा सहृदयैः अनुमीयते? आद्ययोर्न विवादः। तृतीये तु यथाविधाभिप्राय विरह स्थले व्यभिचारः, चन्दन च्यवनादीनां स्नानादिनापि सम्भवात्।

ननु वक्त्रादवस्था सह कृतत्वेन विशेष्यो हेतुरिति चेत्? तदपि न वाच्यम् एवंविध व्याप्त्यनुसन्धानस्याभावात्।

किञ्चैवंविधानां काव्य प्रतिभामात्र जन्मनां प्रामाण्यानावश्यकत्वेन हेतुः सन्दिग्धासिद्धः। व्यक्तिवादिना चाधमपद सहायानामेवैषां पदार्थानां व्यञ्जकत्वम्। तेन च तत्कान्त साधकत्वं प्रामाणिकं न वेति सन्देह एव। तस्मान्नात्र अनुमानस्यावकाशः। अतो नानुमाने गतार्थत्वं व्यङ्ग्यः वस्तु अलङ्कारयोरिति दिक्।

उपेन्द्र झा
18/12/20
एसो० प्रो० साहित्य
रा०उ०सं० महावि०
कुरसेला, पूर्णियाँ

Dec 18, 2020

शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)
साहित्यदर्पणः द्वितीयः परिच्छेदः

---

काव्यप्रकाशोक्तं 'कर्मणि कुशलः' इति लक्षणोदाहरणं साहित्यदर्पणोक्त दिशा खण्डनम् ।

---

अत्रायं आचार्य विश्वनाथेनोक्तम् यत् - केचित (काव्यप्रकाशकारा मम्मट महाभागाः) 'कर्मणि कुशलः' इति स्वाबुदाहरन्ति । तेषामयमभिप्रायः- कुशान् = दर्भान् लाति = आदत्ते, इति कुशलः इति व्युत्पत्या लभ्यः कुशग्राहिरूपो मुख्योऽर्थः प्रकृतेऽसम्भवन् विवेचकत्वादि साधर्म्यं सम्बन्ध सम्बन्धिनं दक्षरूपमर्थं लक्षयति ।

परं नेदं कथनं विचार सङ्गतम् । कुशग्राहिरूपार्थस्य व्युत्पत्ति लभ्यत्वेऽपि दक्षरूपस्यैव मुख्यार्थत्वात् । अन्यद्धि शब्दानां व्युत्पत्ति निमित्तम् अन्यच्च प्रवृत्ति निमित्तम्, यदिहि व्युत्पत्ति लभ्य एव मुख्योऽर्थस्तदा 'गौः शेते' इत्यत्रापि लक्षणा स्यात् 'गमेर्डोः' (उणादि 2/67) इति गम् धातोः डो प्रत्यये कृते निष्पन्नस्य गो शब्दस्य शयनकालेऽप्रयोगात् ।

यदि च व्युत्पत्तिरेव प्रवृत्ति निमित्तमिति मन्यते तथापि कुशलः इत्यत्र लक्षणायाः नावसरः । कौ = भुवि, शलति = चालयति, कार्याणि, यः स कुशलः इति व्युत्पत्याऽपि दक्षरूप एवं मुख्योऽर्थः इत्यलम् ।

उपेन्द्र झा
18/12/20
एसो० प्रो० साहित्य
रा० उ० सं० महाविद्यालय
कुरसेला, पूर्णिया